# संस्कृत-वार्ता:

दिनाङ्कः-13.10.2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- दिल्ल्याः राऊस-एवन्यू-न्यायालयेन कथिते आई.आर. सी. टी. सी. - भ्रष्टाचार-प्रकरणे राष्ट्रिय-जनता-दलस्य, अध्यक्षस्य लालू-प्रसादस्य, तस्य पत्न्याः राबड़ी-देव्याः, पुत्रस्य तेजस्वी-यादवस्य, अन्येभ्यः च विरुद्धं विविधाः आपराधिक-अभियोगाः कल्पिताः सन्ति।
- जोएल मोकिर, फिलिप अघियन, पीटर होविट इत्येतान् च नवान्वेषणाय आर्थिकवृद्ध्यै च तेषां अभूतपूर्वकार्यस्य कृते नोबेल-पुरस्कारः प्रदत्त: ।
- अमरीकादेशस्य राष्ट्रपतिः डोनाल्ड् ट्रम्पः इस्राइल-देशस्य संसदं संबोधितवान्, इस्राइल-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहु राष्ट्रपति-ट्रम्पं इस्राइल-देशस्य श्रेष्ठतमसहयोगीति उक्तवान्।।
- क्रिकेट्-क्रीडायां, नवदिल्ल्यां क्रीडिते द्वितीय-निकष-क्रीडायाः चतुर्थे दिने वेस्ट्-इण्डीज-विरुद्धं एकविंशत्यधिकैकशत धावनांकानाम् अनुसरणे भारतीय दलं प्रथम स्तोभाय त्रिषष्ठिः धावनांकेषु अस्ति।

---------------------------------------------

<u>न्यायालय: - लालू</u>

दिल्ल्याः राऊस-एवन्यू-न्यायालयेन कथिते आई.आर. सी. टी. सी. - भ्रष्टाचार-प्रकरणे राष्ट्रिय-जनता-दलस्य, अध्यक्षस्य लालू-प्रसादस्य, तस्य पत्न्याः राबड़ी-देव्याः, पुत्रस्य तेजस्वी-यादवस्य, अन्येभ्यः च विरुद्धं विविधाः आपराधिक-अभियोगाः कल्पिताः सन्ति। पी. सी. अधिनियमस्य विशिष्ट-न्यायाधीशेन विशाल गोगने इत्यनेन आदेशः प्रदत्तः। न्यायालयेन त्रयाणां विरुद्धं भ्रष्टाचारस्य, आपराधिक-षड्यन्त्रस्य, कपटस्य च अभियोगाः कल्पिताः। सर्वेपि अभियुक्ताः अपराधं न स्वीकृतवन्तः अतः प्रकरणे विचारः अनन्तरं भविष्यति। केन्द्रीय-अन्वेषण-अभिकरणेन आरोपितं यत् चतुराधिक द्विसहस्रतम वर्षात् नवोत्तर द्विसहस्रतम वर्ष पर्यन्तं

रेलमन्त्री रूपेण लालू-यादवस्य कार्यकाले, लालू-यादवः तस्य परिवारः च एकां निजीसंस्थां प्रति अनुबन्धं दातुं प्रधानभूमिं उत्कोचरूपेण स्वीकृतवान् इति।

---------------------------------------------

## राष्ट्रपति मुर्मु:

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य नवदिल्ल्यां राष्ट्रपतिभवने लद्दाख-प्रदेशस्य महिलानां वरिष्ठनागरिकाणां च समूहेन सह मिलितवती। सामाजिकान्तर्जालीय सन्देशे राष्ट्रपतिः अवदत् यत् राष्ट्रिय-एकता-यात्रायाः भागरूपेण समूहः राष्ट्रपतिभवनं प्राप्तवान् आसीत्।

---------------------------------------------

## नोबेल्-पुरस्कार:

पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य अर्थशास्त्रस्य नोबेल-पुरस्कारः जोएल मोकिर, फिलिप अघियन, पीटर होविट इत्येतान् च नवान्वेषणाय आर्थिकवृद्ध्यै च तेषां अभूतपूर्वकार्यस्य कृते प्रदत्त: अस्ति। नोबेल-समित्यानुसारं, एते त्रयः अर्थशास्त्रिणः नवान्वेषण-चालित-आर्थिकवृद्धेः व्याख्यायै सम्मनिताः।

---------------------------------------------

## डोनाल्डट्रम्प-इस्राइल

संयुक्तराज्यामरीका-देशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः अवदत् यत् अन्धकारे बन्धने च वर्षद्वयानन्तरं, विंशति साहसिक-इस्राइल-बन्धकाः स्वकुटुम्बं प्रति प्रत्यागताः सन्ति। अमरीकादेशस्य राष्ट्रपतिः डोनाल्ड ट्रम्पः अद्य यरूसलम-नगरे इस्राइल-देशस्य संसदि 'द नेसेट्' इत्यत्र भाषमाणः आसीत्। अस्मिन् अवसरे इस्राइल-देशस्य प्रधानमन्त्री बेञ्जामिन् नेतन्याहु-वर्यः अमरीकादेशस्य राष्ट्रपतिं डोनाल्ड ट्रम्पं इस्राइल-देशस्य श्रेष्ठतमसहयोगीति उक्तवान्।

---------------------------------------------

## बिहार-अधिसूचना

निर्वाचन-आयोगेन बिहारराज्यस्य विधानसभा-निर्वाचनस्य द्वितीय-चरणस्य कृते अधिसूचना प्रसरितास्ति। अनेन सहैव विंशति मण्डलेषु द्वाविंशत्यधिकैकशत विधानसभाक्षेत्राणां कृते नामाङ्कनप्रक्रिया आरब्धाऽस्ति। द्वितीयस्य चरणस्य कृते नामाङ्कन प्रक्रियायाः अन्तिमातिथिः अक्टूबर मासस्य विंशति दिनांकः अस्ति। नामाङ्कनपत्राणां परीक्षणं अक्टूबर-मासस्य एकविंशतिः दिनाङ्के भविष्यति, नामाङ्कन-प्रत्यावर्तनस्य अन्तिमातिथिः अक्टूबर-मासस्य त्रयोविंशति दिनाङ्कः अस्ति। अस्य चरणस्य मतदानं नवम्बरमासस्य एकादश-दिनाङ्के भविष्यति।

---------------------------------------------

## भाजपा-बिहार:

भाजपा-बिहार दलस्य अध्यक्षः डा. दिलीप जायसवालः अवदत् यत् प्रत्याशिनां सूची पूर्णतया अनुमोदितास्ति, अद्य सायङ्काले प्रथमस्य चरणस्य कृते नाम्नां घोषणा भविष्यति। पटना-नगरे प्रसारमाध्यमैः सह वार्तालापं कुर्वन् डा. जायसवालः अवदत् यत्, सहयोगी-दलानां मध्ये आसनानां वितरणस्य निर्णयः अतीव सौहार्दपूर्णवातावरणे अभवत्। अन्यानि एन. डी. ए. इति घटबंधनस्य सहयोगी दलानि, यथा जे. डी. (यू) आदि दलानि अद्य स्वीय प्रत्याशिनां नामानि घोषयेयुः इति सम्भावना विद्यते।

जन-सुराज-दलम् अपि अद्य प्रत्याशिनां द्वितीया सूची प्रकाशयिष्यति । दलेन पूर्वमेव एकपञ्चाशत् यावत् प्रत्याशिनां प्रथमा सूची प्रकाशितम्। एतदतिरिच्य, महा-गठबन्धनस्य घटक दलेषु आसनविभाजनविषये चर्चा अधुनापि प्रचलति।

## निर्वाचन-आयोग:

निर्वाचन-आयोगेन अद्य सप्तराज्याणाम् अष्टविधानसभाक्षेत्राणां कृते उप-निर्वाचनस्य सूचना प्रसारितास्ति। एतेषु विधानसभाक्षेत्रेषु जम्मू-काश्मीरे बडगाम-नगरोटा-मण्डले, राजस्थाने अन्ता-मण्डलं, झारखण्डे घाटशिला-मण्डलं, तेलङ्गाना-राज्ये जुबिलि हिल्स-मण्डलं,

पञ्जाब-राज्ये तरन-तारन-मण्डलं, मिजोरम-राज्ये डम्पा-मण्डलम्, ओडिशा-राज्ये नुआपाडा-मण्डलं च अस्ति। जम्मू-कश्मीरस्य ओडिशा-राज्यस्य च नामाङ्कनपत्रस्य अन्तिमा तिथिः अस्य मासस्य विंशति दिनाङ्कः अस्ति तथा च झारखण्ड, मिजोरम, पञ्जाब, तेलङ्गाना, राजस्थान-राज्यानां नामाङ्कनपत्रस्य अन्तिमा तिथिः अस्मिन् मासे एकविंशति दिनाङ्के अस्ति। एतेषां विधानसभा-स्थानानां कृते उप-निर्वाचनं नवम्बरमासस्य एकादश दिनाङ्के भविष्यति, मतानां गणना च नवम्बरमासस्य चतुर्दश दिनाङ्के भविष्यति।

---------------------------------------------

**<u>अश्विनीवैष्णवः</u>**

केन्द्रीय-रेल-मन्त्री अश्विनीवैष्णवः अघोषयत् यत् रेलवे-सुरक्षा-बलस्य -आर. पी. एफ़. इत्यस्य नियुक्तयः इदानीं प्रतिवर्षं कर्मचारी-चयन-आयोगेन सञ्चालिताः भविष्यन्ति। मन्त्रिणा आधुनिक-तन्त्रज्ञानेन सह बलस्य उन्नतिकरणार्थं अनेकाषाम् उपक्रमाणाम् अपि अनावरणं कृतम्। गुजरातस्य वलसाड-नगरे आर. पी. एफ़. इत्यस्य एकचत्वारिंशत्तमे संस्थापनादिवसे समारोहं सम्बोधयन् मन्त्री अवदत् यत् आर. पी. एफ़. इत्यस्य कर्मचारिणः शीघ्रमेव वी. एच. एफ. सेट इत्यनेन युक्ताः भविष्यन्ति, तथा च तेषां परिचालनक्षमतां वर्धयितुं उन्नत-डिजिटल तथा ड्रोन-प्रशिक्षणं प्रदीयते।

---------------------------------------------

**<u>करूर- जनसभा-दुर्घटना</u>**

सर्वोच्चन्यायालयेन तमिलनाडु-राज्ये करूर- जनसभा-दुर्घटनायाः सी. बी. आई. इति केन्द्रियान्वेषण-अभिकरणम् अन्वेषणस्य आदेशः प्रदत्तः, अवधेयं यत् गतमासस्य सप्तविंशति दिनाङ्के टी. वी. के. इति **तमिलगा वेत्रि कझगम** इत्यस्य राजनैतिकसभायाः समये न्यूनातिन्यूनं एकचत्वारिंशत् जनाः मृताः। तमिल-अभिनेतुः विजयस्य नेतृत्वे दलेन, मद्रास-उच्चन्यायालयस्य घटनायाः विशिष्ट-अन्वेषण-दलस्य अन्वेषणस्य आदेशस्य विरुद्धं सर्वोच्च-न्यायालये आवेदितम् आसीत्। सर्वोच्चन्यायालयस्य न्यायमूर्ति जे. के. माहेश्वरी तथा न्यायमूर्ति एन. वी. अञ्जारिया

इत्येतयोः, सर्वोच्चन्यायालयस्य पीठेन पूर्वन्यायाधीशस्य अजय रस्तोगी इत्यस्य नेतृत्वे त्रिसदस्यीय-समित्याः गठनं कृतम्।

---------------------------------------------

## क्रिकेट-क्रीडा

क्रिकेट-क्रीडायां, नवदिल्ल्यां क्रीडिते द्वितीय-निकष-क्रीडायाः चतुर्थे दिने वेस्ट-इण्डीज-विरुद्धं एकविंशत्यधिकैकशत धावनांकानाम् अनुसरणे भारतीय दलं प्रथम स्तोभाय त्रिषष्ठिः धावनांकेषु अस्ति। के. एल. राहुलः, साईं सुदर्शनः च सम्प्रति क्रीडतौ स्तः।

।। इति वार्ताः ।।